तस्य टीका। ब्रह्मणः स्वरूपमन्तराविस्तरकार्य्यमाह। ब्रह्मतेजोमयमिति। तेजोमयं ज्ञानात्मकम्। शुक्रं बीजभूतम्। यस्य सर्व्वमिदं रसः रसनीयं श्रेयं सर्व्वं यस्यैकस्य भूतं सत्यं न तु विवर्त्तवादिनामिवासत्यं भूतस्य सिद्धस्य अकल्पितस्य तत्र सर्व्वं स्थावरजङ्गमोपाधिवशात् इयं द्वेधा॥ तत्र सगुणनिर्गुणभेदेन द्विविधं यथा,

"ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सम्मतम्।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!॥
मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवानिच्छया विकरोति च॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्॥
केचिद्वदन्ति द्विविधं ब्रह्म प्रकृतिपूर्व्वकम्।
प्रश्नु ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्॥
तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्व्वकारणम्।
अथवैकं परं ब्रह्म द्विविधं भवतीच्छया॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
तत्रासक्तश्च सगुणः स शरीरी च प्राकृतः॥
निर्गुणस्तत्र निर्लिप्तः अशरीरी निरङ्कुशः।
स चात्मा भगवान्नित्यः सर्व्वाधारः सनातनः॥
सर्व्वेश्वरः सर्व्वसाक्षी सर्व्वत्रास्ति फलप्रदः।
शरीरं द्विविधं शम्भो! नित्यं प्राकृतमेव च॥
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
अहं त्वञ्चापि भगवन्नावयोर्नित्यविग्रहः॥
आवयोरंशभूता ये प्राकृता नष्टविग्रहाः।
ब्रह्मादयस्तदंशाश्च मदंशा विष्णुरूपिणः॥
ममाप्येवं द्विधा रूपं द्विभुजञ्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह॥
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं मे वदन्त्येवं द्वौ प्रधानौ तु तन्मते॥
पुरुषश्च सदा नित्यो नित्या प्रकृतिरीश्वरी।
सदा तौ द्वौ च संश्लिष्टौ सर्व्वेषां पितरौ शिव!॥
सशरीरौ निःशरीरौ स्वेच्छया सर्व्वरूपिणौ।
प्राधान्यञ्च यथा पुंसः प्रकृतेश्च तथा सदा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४३ अध्यायः॥

नन्दयशोदां प्रति श्रीकृष्णवाक्यं यथा,—

"मामेव परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुत्त्रबुद्धिं त्यक्त्वा लभ परं पदम्॥"

इति तत्रैव १२७ अध्यायः॥

सगुणस्य तस्य नवधा रूपं यथा,—

"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्१।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्२॥
वेदा वदन्ति सत्यं यं ३ नित्यमाद्यं विचक्षणाः४।
यं वदन्ति सुराः सर्व्वे परं स्वेच्छामयं प्रभुम्५॥
सिद्धेन्द्रा मुनयः सर्व्वे सर्व्वरूपं वदन्ति यम् ६।
यमनिर्व्वचनीयञ्च योगीन्द्रः शङ्करो वदेत् ७॥
स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८।
शेषो वदेदनन्तं यं नवधा रूपमीश्वरम् ९॥
तर्काणामेव सर्व्वा यं बहुविधं रूपमीश्वरम्।
वैष्णवानामेकरूपं वेदानामेकमेव च॥
पुराणानामेकरूपं तस्मान्नवविधं स्मृतम्।
न्यायो निर्व्वचनीयञ्च यन्मतं शङ्करोऽब्रवीत्॥
नित्यं वैशेषिकास्त्वन्तं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्व्वरूपञ्च वेदान्तः सर्व्वकारणम्।
पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्॥"

इति तत्रैव १२८ अध्यायः॥

सगुणनिर्गुणभेदेन तस्य चतुर्धा रूपं यथा,—

"चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्द्दनः॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान्।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः।
इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितो विष्णुः करोति परिपालनम्।
मन्वादिरूपी चान्येन कालरूपी परेण च॥
सर्व्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः॥
अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपो भागोऽन्यः सर्व्वभूतानि चापरः॥
विनाशं कुर्व्वतस्तस्य चतुर्द्धैवं महात्मनः॥"

इति विष्णुपुराणे १ अंशे २१ अध्यायः॥

ब्रह्मध्यानं यथा,—

"ब्रह्मध्यानं प्रवक्ष्यामि मायातन्त्रविमर्द्दकम्।
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञानमात्मनि॥
ज्ञानं महति संयच्छेद्य इच्छेत् श्रेय आत्मनि।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूततन्मात्रैर्गुणजन्माशनादिभिः।
स्वप्रकाशं निराकारं सदानन्दमनादिमत्॥
नित्यं शुद्धं बुद्धमुक्तं सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचराः॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्य विज्ञानवानात्मा युक्तेन मनसा सदा॥
न स तत्पदमाप्नोति युक्तेन मनसा तदा।
स तत्पदमवाप्नोति स हि भूयो न जायते।
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिनियमः स्मृतः।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम्।
मनोधृतिर्धारणं स्यात् समाधिर्ब्रह्मणः स्मृतः॥"

साकारस्य तस्य ध्यानं यथा,—

"अमूर्त्ते चेत् स्थिरो न स्यात्ततो मूर्त्तं विचिन्तयेत्।
हृत्पद्मकर्णिकामध्ये शङ्खचक्रगदाब्जवान्।
श्रीवत्सकौस्तुभयुतो वनमाली श्रिया युतः।
नित्यः शुद्धो बुद्धियुक्तः नित्यानन्दाक्षयः परः॥
आत्माहं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्व्विंशतिमूर्त्तिः स शालग्रामशिलास्थितः॥
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा हरिः।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत्॥
निष्कामो मुक्तिमाप्नोति मूर्त्तीर्ध्यायन् स्तुवन् जपन्॥"

इति गारुडे मूर्त्तामूर्त्तध्यानं ४४ अध्यायः॥

ब्रह्मपदप्राप्तिकारणं यथा,—

"ब्रह्मण्याधाय कर्म्माणि निःसङ्गः कामवर्जितः।
प्रसन्नेनैव मनसा कुर्व्वाणो याति तत्पदम्॥"

इति कूर्म्मपुराणे ३ अध्यायः॥

सर्व्वं ब्रह्म यथा,—

"ब्रह्मैवेदं जगत् सर्व्वं ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका॥"

इत्यात्मबोधः॥

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पुं, ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।

"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं सरोवरम्।) ब्रह्मणा निर्म्मितसरोवरविशेषः। यथा,

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाख्यं सरः।
ब्रह्मणा निर्म्मितं पूर्व्वं स्नानाय स्वर्गवासिनाम्॥
आयामेन शतव्यामं विस्तीर्णेन तदर्द्धकम्।
सर्व्वपापहरं पुण्यं देवलोकात् समागतम्॥
तत्र स्नानमन्त्रः।
कमण्डलुसमुद्भूत ब्रह्मकुण्डाम्बुसम्भव।।
हर मे सर्व्वपापानि पुण्यं स्वर्गञ्च साधय॥
इत्यनेन तु मन्त्रेण स्नाति तस्मिन् सरोजले।
पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्॥
ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

इति कालिकापुराणे ८१ अध्यायः॥

ब्रह्मकूटः, पुं, (ब्रह्मा कूटे शिखरे यस्य।) पर्व्वतविशेषः। यथा, कालिकापुराणे ८२ अध्यायः॥

"ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

ब्रह्मकूर्च्चं, क्ली, (ब्रह्मणो ब्राह्मणस्य कूर्च्चमिव।) व्रतविशेषः। यथा। वृद्धशातातपः।

"रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतःपरम्॥"

पञ्चगव्यपानं व्रतरूपं तेनोपवासः। ब्रह्मकूर्च्चमाह जावालः।

"अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः॥"